पत्राचारसंस्कृतस्य चतुर्थः स्तरः

कोविदः

पाठः ४२ – २८.०९.२०१९

vyómaa
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

vyomlabs
॥ वाचं धेनुमुपासीत ॥
Samskrtam · Value Education · Technology

स्वागतम्!



गुरुरेव गतिर्गुरुमेव भजे
गुरुणैव सहास्मि नमो गुरवे ।
न गुरोः परमं शिशुरस्मि गुरोः
मतिरस्ति गुरौ मम पाहि गुरो ॥

पुनरावर्तनम्

• वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

• तस्मिन्क्षणे पालयितुः प्रजानाम् उत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ॥

• उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ।
ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम् ॥

• तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोऽसि ।
ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ॥

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- १) पदच्छेदः + सन्धिः
- भक्त्या, गुरौ, मयि, अनुकम्पया, च, प्रीता, अस्मि, ते, पुत्र, वरम्, वृणीष्व
- न, केवलानाम्, पयसाम्, प्रसूतिम्, अवेहि, माम्, कामदुघाम्, प्रसन्नाम्

यण्सन्धिः

सवर्णदीर्घः

अनुस्वारसन्धिः

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

•२) सामान्यार्थः

•नन्दिनी उक्तवती – “पुत्र, तव गुरुभक्त्या, मम विषये दयया च अहं सन्तुष्टा । यथेष्टं वरं याचस्व । अहं तु साक्षात् कामधेनुः एव ।

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ३) वाक्यविश्लेषणम् (विभक्तिः)
- क्रियापदम् – अस्मि, वृणीष्व, अवेहि
- प्रथमा – प्रीता
- सम्बोधनप्रथमा – पुत्र
- द्वितीया – वरम्, प्रसूतिम्, माम्, कामदुघाम्, प्रसन्नाम्
- तृतीया – भक्त्या, अनुकम्पया
- चतुर्थी - ते
- षष्ठी – केवलानाम्, पयसाम्
- सप्तमी – गुरौ, मयि
- अव्ययम् – च, न

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ४) आकाङ्क्षाक्रमेण अन्वयः, प्रतिपदार्थः
- पुत्र = हे वत्स!
- अस्मि
- का अस्मि? अहम् = नन्दिनी
- कीदृशी अस्मि? प्रीता = प्रसन्ना
- कया प्रीता? भक्त्या = सेवानिष्ठया

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ४) आकाङ्क्षाक्रमेण अन्वयः, प्रतिपदार्थः
- कस्मिन् भक्त्या? गुरौ = वसिष्ठे
- पुनः कया प्रीता? अनुकम्पया = दयया
- कस्मिन् अनुकम्पया? मयि = नन्दिन्याम्
- कस्मै प्रीता? ते = तुभ्यम्

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ४) आकाङ्क्षाक्रमेण अन्वयः, प्रतिपदार्थः
- वृणीष्व = स्वीकुरु
- कं वृणीष्व? वरम् = ईप्सितम्

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ४) आकाङ्क्षाक्रमेण अन्वयः, प्रतिपदार्थः
- न अवेहि = मा जानीहि
- कां न अवेहि? माम् = नन्दिनीम्
- कीदृशीं न अवेहि? केवलानां पयसां प्रसूतिम् = क्षीरमात्रप्रदात्रीम्

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ४) आकाङ्क्षाक्रमेण अन्वयः, प्रतिपदार्थः
- अवेहि = विद्धि
- काम् अवेहि? प्रसन्नां माम् = प्रीतां नन्दिनीम्
- कीदृशीम् अवेहि? कामदुघाम् = सर्वकामदात्रीं कामधेनुम्

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- **अन्वयः** – पुत्र! गुरौ भक्त्या, मयि अनुकम्पया च ते प्रीता अस्मि । वरं वृणीष्व । मां केवलानां पयसां प्रसूतिं न अवेहि । प्रसन्नां मां कामदुघाम् अवेहि ।
- **भावार्थः** – हे वत्स! तव गुरुभक्त्या, मद्विषये दयया च अहं प्रसन्ना अस्मि । ईप्सितं स्वीकुरु । मां क्षीरमात्रप्रदात्रीं मा चिन्तय, अपि तु प्रीता अहं सर्वकामप्रदात्री कामधेनुः एव इति जानीहि ।

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ५) व्याकरणांशाः
- भक्त्या
  - इकारान्तः, स्त्री, ३.१
  - भज् + क्तिन् (कृदन्तः)

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ५) व्याकरणांशाः
- गुरौ
  - उकारान्तः, पुं, ७.१
  - “उपाध्यायोऽध्यापकोऽथ स्यात् निषेकादिकृद्गुरुः।
    मन्त्रव्याख्याकृदाचार्यः”

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ५) व्याकरणांशाः
- मयि
  - दकारान्तः, त्रि, अस्मद्, ७.१
- अनुकम्पया
  - आकारान्तः, स्त्री, ३.१
  - अनु+कम्प्+अ (कृदन्तः) । “कृपा दयानुकम्पा स्यात्”

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ५) व्याकरणांशाः
- प्रीता
  - आकारान्तः, स्त्री, १.१
  - प्री + क्त (कृदन्तः)

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ५) व्याकरणांशाः
- अस्मि
  - अस्, लट्, उत्तम.१
- ते
  - दकारान्तः, त्रि, युष्मद्, ४.१

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ५) व्याकरणांशाः
- पुत्र
  - अकारान्तः, पुं, सम्बोधनप्रथमा.१
- वरम्
  - अकारान्तः, पुं, २.१

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ५) व्याकरणांशाः
- वृणीष्व
  - वृ धातुः, लोट्, आत्मनेपदे मध्यम.१
  - “वृङ् सम्भक्तौ”

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ५) व्याकरणांशाः
- केवलानाम्
  - अकारान्तः, नपुं, ६.३
- पयसाम्
  - सकारान्तः, नपुं, ६.३
  - “दुग्धं क्षीरं पयः समम्”

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ५) व्याकरणांशाः
- प्रसूतिम्
  - इकारान्तः, स्त्री, २.१
  - प्र+सू+क्तिन्

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ५) व्याकरणांशाः
- अवेहि
  - अव+आ+इण् धातुः, लोट्, मध्यम.१
- माम्
  - दकारान्तः, त्रि, २.१

२.६३

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम् ॥

- ५) व्याकरणांशाः
- कामदुघाम्
  - आकारान्तः, स्त्री, २.१
  - कामान् दोग्धि – उपपदसमासः ।
- प्रसन्नाम्
  - आकारान्तः, स्त्री, २.१
  - प्र+सद्+क्त (कृदन्तः)

पाठ्यक्रमे अनिर्दिष्टः श्लोकः

- ततः समानीय स मानितार्थी
- हस्तौ स्वहस्तार्जितवीरशब्दः ।
- वंशस्य कर्तारमनन्तकीर्तिं
- सुदक्षिणायां तनयं ययाचे ॥२.६४॥

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- १) पदच्छेदः + सन्धिः

गुणसन्धिः अनुस्वारसन्धिः

- सन्तान-कामाय, तथा, इति, कामम्, राज्ञे, प्रतिश्रुत्य, पयस्विनी, सा
- दुग्ध्वा, पयः, पत्त्रपुटे, मदीयम्, पुत्र, उपभुङ्क्ष्व, इति तम्, आदिदेश

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- २) सामान्यार्थः
- सन्ततिं प्रार्थिवते राज्ञे नन्दिनी “तथाऽस्तु” इति वरं दत्तवती । “मम क्षीरम् आहर” इति आदिष्टवती च ।

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- ३) वाक्यविश्लेषणम् (विभक्तिः)
- क्रियापदम् – आदिदेश, उपभुङ्क्ष्व
- प्रथमा – पयस्विनी, सा
- सम्बोधनप्रथमा - पुत्र
- द्वितीया – काममम्, पयः, मदीयम्, तम्
- चतुर्थी – सन्तानकामाय, राज्ञे
- सप्तमी - पत्त्रपुटे
- अव्ययम् – तथा, इति, प्रतिश्रुत्य, दुग्ध्वा, इति

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- ४) आकाङ्क्षाक्रमेण अन्वयः, प्रतिपदार्थः
- आदिदेश = आज्ञापितवती
- का आदिदेश? सा पयस्विनी = नन्दिनीधेनुः
- किं कृत्वा आदिदेश? प्रतिश्रुत्य = प्रतिज्ञाय
- कं प्रतिश्रुत्य? कामम् = वरम्

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- ४) आकाङ्क्षाक्रमेण अन्वयः, प्रतिपदार्थः
- किमिति प्रतिश्रुत्य? तथा इति = “तथाऽस्तु” इति
- कस्मै प्रतिश्रुत्य? राज्ञे = नृपाय दिलीपाय
- कीदृशाय राज्ञे? सन्तानकामाय = सन्ततिम् इच्छते

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- ४) आकाङ्क्षाक्रमेण अन्वयः, प्रतिपदार्थः
- किमिति आदिदेश?
- पुत्र = हे वत्स!
- उपभुङ्क्ष्व = पिब
- किम् उपभुङ्क्ष्व? मदीयं पयः = मम क्षीरम्

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- ४) आकाङ्क्षाक्रमेण अन्वयः, प्रतिपदार्थः
- किं कृत्वा उपभुङ्क्ष्व? दुग्ध्वा = दोहनं कृत्वा
- कुत्र दुग्ध्वा? पत्रपुटे = पर्णनिर्मिते पात्रे
- कम् आदिदेश? तम् = दिलीपम्

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- **अन्वयः** – सन्तानकामाय राज्ञे तथा इति कामं प्रतिश्रुत्य सा पयस्विनी "पुत्र! मदीयं पयः पत्त्रपुटे दुग्ध्वा उपभुङ्क्ष्व" इति तम् आदिदेश ।
- **भावार्थः** – सन्ततिम् इच्छते दिलीपाय "तथाऽस्तु" इति वरं प्रतिज्ञाय नन्दिनी "हे वत्स! पर्णनिर्मिते पात्रे मम क्षीरस्य दोहनं कृत्वा पिब" इति राजानम् आज्ञापितवती ।

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- ५) व्याकरणांशाः
- सन्तान-कामाय
  - अकारान्तः, पुं, ४.१
  - सन्तानं कामयते - उपपदसमासः

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- ५) व्याकरणांशाः
- काममम्
  - अकारान्तः, पुं, २.१
  - "इच्छा-मनोभवौ कामौ"
- राज्ञे
  - नकारान्तः, पुं, ४.१

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- **५) व्याकरणांशाः**
- प्रतिश्रुत्य
  - प्रति+श्रु+ल्यप् । अव्ययम् ।
- पयस्विनी
  - ईकारान्तः, स्त्री, १.१
  - पयः अस्याः अस्ति – पयस् + विनि (मत्वर्थः)

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- ५) व्याकरणांशाः
- दुग्ध्वा
  - दुह् + क्त्वा । अव्ययम्
- पयः
  - सकारान्तः, नपुं, २.१

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- ५) व्याकरणांशाः
- पत्त्र-पुटे
  - अकारान्तः, पुं, ७.१
  - पत्त्रस्य पुटः (षष्ठी तत्पुरुषः) / पत्त्रनिर्मितः पुटः (मध्यमपदलोपः)

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- ५) व्याकरणांशाः
- मदीयम्
  - अकारान्तः, नपुं, २.१
  - मम इदम् – अस्मद् + छ (तद्धितः)

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- ५) व्याकरणांशाः
- उपभुङ्क्ष्व
  - उप + भुज् – आत्मनेपदे लोट्, मध्यम.१
  - “भुज पालन-अभ्यवहारयोः”

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- ५) व्याकरणांशाः
- तम्
  - दकारान्तः, पुं, २.१
- आदिदेश
  - आ+दिश् – लिट्, प्रथम.१
  - “दिश अतिसर्जने”

२.६५

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्त्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

- ६) अलङ्कारः, छन्दः
- इन्द्रवज्रा वृत्तम्

सङ्क्षेपः

- भक्त्या गुरौ मय्यनुकम्पया च
  प्रीतास्मि ते पुत्र वरं वृणीष्व ।
  न केवलानां पयसां प्रसूतिम्
  अवेहि मां कामदुघां प्रसन्नाम् ॥ २.६३ ॥
- सन्तानकामाय तथेति कामं
  राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
  दुग्ध्वा पयः पत्त्रपुटे मदीयं
  पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥ २.६५ ॥

अग्रिमवर्गे

- स नन्दिनीस्तन्यमनिन्दितात्मा
  सद्वत्सलो वत्सहुतावशेषम् ।
  पपौ वसिष्ठेन कृताभ्यनुज्ञः
  शुभ्रं यशो मूर्तमिवातितृष्णः ॥२.६९॥

अग्रिमः वर्गः

११ अक्टोबर् २०१९



QUESTIONS/DOUBTS?

Email us @

sanskritfromhome

@vyomalabs.in

- For downloading course-materials, login @ www.sanskritfromhome.in
- Subscribe to our youtube channel @ vyoma-samskrta-pathasala
- Buy our Samskrita-learning products @ www.digitalsanskritguru.com
- Support our cause for Samskrita-Samskriti @ www.vyomalabs.in

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.
All materials shared in our website are purely for the purpose of personal study.
Replication/reuse in any form without written permission from the organisation is prohibited.